## काव्यशास्त्रविनोद:

**ये च मूढतमा: लोके ये च बुद्धे: परं गता: |**

**ते एव सुखं एधन्ते मध्यमा: क्लिष्यन्ते जना: ||**

अनुवाद: - सुखे स्व | एक: मूढतम: अन्य: यस्य बुद्धी: एतस्य जगत: परा | शेषजना: मध्यमा: अत: क्लिष्यन्ति ||



### सुभाषितम्

व्यसने मित्र परीक्षा शूर परीक्षा रणाङ्गणे भवति |

विनये भृत्यपरीक्षा दानपरीक्षा च दुर्भिक्ष्ये ||

अनुवाद: - मित्रस्य परीक्षा आपत्तिकाले | शूरस्य परीक्षा युद्धभुम्यां  तथा दासस्य परीक्षा विनये अस्ति | तथैव दातु: परीक्षा दुर्भिक्ष्येकाले  अस्ति ||



पाक्षिक-संस्कृतप्रभातम्,  मोक्षदा -एकादशी मार्गशीर्ष: शु.११  मङ्गलवासरे युगाब्दे ५११६ ; दक्षिणायण, अंक: ११  वर्ष: १  दि. २  डिसेम्बर:२०१४

# संस्कृत-प्रभातम्



## || प्रार्थना ||

**नमो विशुध्दसत्त्वाय हरये हरिमेधसे |**

**वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ||**

हे भगवन् ! वयं भवन्तं  नुम:| भवत: अस्तित्त्वं भौतिक स्थित्या: प्रभावेषु कदापि न | भवान् सदैव भक्तानां क्लेशान्  हरति | भवान् सर्वत्र व्याप्त: तथा वसुदेवं पितु: सम्बन्धे स्वीकृतवान् अत: भवान् वासुदेव: नाम्ना प्रसिध्द: अस्ति | भवान् कृष्ण: नाम्ना अपि विख्यात:| भवान्  सर्वदा भक्तानां प्रभावस्य वृध्दिम् करोति|

# संस्कृत- प्रभातम् सङ्घ

**प्रमुख-मार्गदर्शक:**

प. पू. भक्तिरसामृत स्वामी

**मार्गदर्शक:**

बालगोविंद दास:

**सम्पादकप्रकाशकौ मुद्रकौ च**

धीरशांत दास:

कनाई कृष्ण दास:

**सदस्या:**

श्यामलीला दास:

पोकळे नीरज:

कुलकर्णी सागर:

पाण्डे अभिषेक:

जय गोपाल दास:

अजयगौराङ्ग दास:

ऐश्वर्या सुन्दरी देवी

शोभा लक्ष्मी देवी


## अनुक्रमणिका


प्रार्थना................................१

संकेत....................................२

सम्पादकीयम्.........................३

सम्भाषणम्...........................४

पदरञ्जनी.............................५

शब्दसङ्ग्रह: ........................६

कथा ...................................७

सुभाषितम्...........................८



प्रकाशनं मुद्रणं च संकेत-

पाक्षिक- संस्कृतप्रभातम्, इस्कान, हरे कृष्ण चौक,

५० गोकुलनगरे कोंढवा - पुणे-४८

विद्युत/अणुपत्रम् संकेत

sanskritprabhatam@gmail.com, d16108@gmail.com

भ्रमणध्वनी-८८८८८४४६४८




पाक्षिक-संस्कृतप्रभातम्, मोक्षदा -एकादशी मार्गशीर्ष: शु.११ मङ्गलवासरे युगाब्दे ५११६ ; दक्षिणायण, अंक: ११ वर्ष: १ दि. २ डिसेम्वर:२०१४




## शब्द सङ्ग्रह

| | | |
|---|---|---|
|  |  |  |
| **कृषक:** | **वृषभ:** | **भल्लूक:** |
|  |  |  |
| **मण्डूक:** | **कपोत:** | **पर्यङ्क:** |
|  |  |  |
| **दूरभाष:** | **काक:** | **सौचिक:** |



## कथा

दक्षिणसमुद्रतीरे टिट्टिभदम्पती निवसतः | तत्र चासन्नप्रसावा टिट्टिभी भर्तारमाह - नाथ ! प्रसवयोग्यस्थानं निभृत मनुसङ्घीयाताम् | टिट्टिभो अवदत् - भार्ये ! नन्विदमेव स्थानं प्रसूति योग्यम् | सा ब्रूते - समुद्र वेलया व्याप्यते स्थानमेतत् | टिट्टिभो अवदत् 'किमहं निर्बलः समुद्रेण निग्रहीतव्यः ? | टिट्टिभी विहस्याह - 'स्वामीन् ! त्वया समुद्रेण च महदन्तरम् | ततः कृच्छ्रेण स्वामिवचनात्सा तत्रैव प्रसूता | ततष्टिट्टिभी शोकार्ता भर्तारमाह - 'नाथ ! कष्टमापतितम् | तान्यण्डानि मे नष्टानि |' टिट्टिभो अवदत् - 'प्रिये ! मा भैषि: |' एत्युक्त्वा पक्षिणाम् मेलकं कृत्वा पक्षिस्वामिनो गरूडस्य समिपं गतः | तत्र गत्वा सकल वृतान्तं टिट्टिभेन भगवतो गरुडस्यपुरतो निवेदितम्- 'देव ! समुद्रेणाहं स्वगृहावस्थितो विनापराधेनैव निगृहीतः| 'ततस्तद्वचनमाकर्ण्य गुरुत्मता प्रभुर्भगवान्नारायण: सृष्टिस्थितिप्रलयहेतुर्विज्ञप्त: | सः समुद्रदण्डदानायदिदेश | ततो भागवदाज्ञाम् मौलौ निधाय समुद्रेण तान्यण्डानि टिट्टिभाय समर्पितानि |

बोध - ये यत्ना: कुर्वन्ति तान् भगवान अपि साहाय्यं करोति| टिट्टिभदम्पती दृढनिश्चयि आसीत अतः गरुड: श्रीभगवान् च साहाय्यं कृतवन्तौ | भक्ति तथा कृष्णभावनामृतं दुष्करं भासते किन्तु यदी दृढनिश्चयेन् कः अपि एतस्य तत्त्वानां पालनं करोति तं भगवान् निश्चितं साहाय्यं करोति ***



पाक्षिक-संस्कृतप्रभातम्, मोक्षदा -एकादशी मार्गशीर्ष: शु.११ मङ्गलवासरे युगाब्दे ५११६ ; दक्षिणायण, अंक: ११ वर्ष: १ दि. २ डिसेम्वर:२०१४

## सम्पादकीयम्

अद्य मोक्षदा एकादशी, मार्गशीर्ष: मास: शुक्ल पक्ष ११ मङ्गलवासरे युगाब्दे ५११६ अर्थात् दि. २ डिसेम्बर:२०१४ अस्ति | अद्य एव भगवद्गीताया: जन्मदिवसः अस्ति | अद्य भगवद्गीताया: आयुः ५११६ वर्षाणि अस्ति | एष: इतिहास: कलियुगे अस्ति किन्तु महाभारते शान्तीपर्वे ३४८.५१-५२ भगवद्गीताया: मूल: इतिहास: अस्ति -

त्रेतायुगादौ च ततो विवस्वान्मनवे ददौ |
मनुश्च लोकभृत्यर्थं सुतायेक्ष्वाकवे ददौ |
इक्ष्वाकुणा च कथितो व्याप्य लोकानवस्थित: ||

स्थूलप्रमाणेन १२०४००००० वर्षाणि पूर्वं भगवान् तस्य शिष्यं सूर्यदेव-विवस्वानं मनो: जन्मन: पूर्वं भगवद्गीताम् उक्तवान् | विवस्वान: मनूम् उक्तवान् | मनु: तस्य पुत्रं अर्थात् पृथिवीलोकस्य अधिपतिं इक्ष्वाकूम् उक्तवान् |

वर्तमानमनो: आयु स्थूलप्रमाणेन ३०५३००००० वर्षाणि अस्ति | तस्मात् १२०४००००० वर्षाणि गतवन्त: अर्थात् भगवद्गीताया: आयु: १२०४००००० वर्षाणि अस्ति | एषा कल्पितकथा अस्ति इति नास्तिकजनाः वदन्ति | ते मूर्खा: न जानन्ति एष: अतीव पुरातन: ग्रन्थः| एष: सर्वोपनिषदाणाम् सारं अस्ति | अतेव वेदेषु शास्त्रेषु इतिहासेषु च गीताया: महती अस्ति | गीताया: असङ्ख्या: अनुचरा: सन्ति | यदा के अपि सनातन-धर्मेतर-जनाः न आसन् तदापि अर्थात् ३०००वर्षाणि पूर्वं सनातन-धर्म: आसित् | भगवद्गीता सर्वेभ्य: अस्ति | प.पू. आदिशंकराचार्य: उक्तवान् - 'गीता सुगीता कर्तव्या किमन्यै: शास्त्र विस्तरै: |

या स्वयं पद्मनाभस्य मुखपद्माद्विनि:सृता ||'

भगवद्गीतायां बहव: जना: टीकां लिखितवन्त: | ते स्वमतं लिखितवन्त: किन्तु यथारूपां टीकां केवल: आंतरराष्ट्रीय-कृष्णभावनामृत-सङ्गस्य संस्थापकाचार्य: श्रीकृष्णकृपाश्रीमूर्ति अभयचरणारविन्द-भक्तिवेदान्त स्वामी प्रभुपाद: एव लिखितवान् | तस्य यत्नेन सर्वजगति भगवद्गीताया: महती प्रतिदिनं वर्धते |भगवद्गीतां कल्पितकथा मा चिन्तयतु | एषा साक्षात् भगवद्वाणि अस्ति | ****

## सम्भाषणम्



गीता - अम्बे ! हरे कृष्ण !

माता - हरे कृष्ण ! विद्यालयात् आगता असि ?

गीता - आम् ! अद्य अहम् अति श्रान्ता अस्मि |

माता - श्रान्ता ! किमर्थं श्रान्ता असि |

गीता - श्वः विद्यालये वन महोत्सवः भविष्यति | अद्य वयम् उत्सवस्य सज्जायां व्यस्ताः अत: श्रान्ताः स्मः |

माता - वन-महोत्सवे किं भविष्यति ?

गीता - छात्राः गीतं गास्यन्ति , वयम् एकां नाटिकां करिष्यामः|

माता - नाटिकायाः कथा का अस्ति ?

गीता - नाटिकायाः कथा अस्ति - वृक्षः जन्मतः मृत्यू पर्यन्तं कथं जीवानां हितं करोति |

माता - शोभनम् |

गीता - वयं पञ्च पञ्च छात्राः एकम् एकं पादपं रोपयिष्यामः |

माता - कुत्र पादपान् रोपयिष्यथः?

गीता - विद्यालयस्य प्राङ्गणे प्रवेश-मार्गं उभयतः च पादपान् रोपयिष्यामः |

माता - शोभनम ! क: मुख्यातिथि अपि आगमिष्यति ?

गीता - आम् ! सः अपि प्रधानाचार्यया सह वृक्षारोपणं करिष्यति |

माता - अति उत्तमम् |



पाक्षिक-संस्कृतप्रभातम्,  मोक्षदा -एकादशी मार्गशीर्ष: शु.११  मङ्गलवासरे युगाब्दे ५११६ ; दक्षिणायण, अंक: ११  वर्ष: १  दि. २  डिसेम्वर:२०१४

## पदरञ्जनी

### १० पदरञ्जन्या उत्तरम्

| | | | | | |
|---|---|---|---|---|---|
| १ प | थ | | २ च | ष | ३ क |
| व | | ४ इ | क्षू | | टा |
| ५ न | ६ रे | न्द्र | | ७ क | क्ष |
| | णू | | ८ | र्ण | |
| ९ ए | का | १० का | र | | ११ न |
| क | | १२ म | क | र | न्द |

**ऊर्ध्व शब्द -**

१. पुष्प-रजस , पुष्परेणू | २. जितेंद्रिय, पावन | ३. सूर्य | ७. | १०. बुध्दी | ११. स्त्री |

**दिङ्गतसम शब्द -**

१. नवपुष्पम् | २. प्रकाश, दीप्ती | ४. महिषी | ५. प्रौढ ( वि. ) | ६. भीमस्य शस्त्रम् | ८. परतः | ९. आनन्द | १०. मान्सल, पुष्टांग | ११. शिवस्य वीणा | १२. विष्णो: एकम् विशेषणम् | १३. मेरूदण्ड | -

### ११ पदरञ्जनी

| | | | | | |
|---|---|---|---|---|---|
| १ | | | | २ | ३ |
| ४ | | | ५ | | |
| ६ | ७ | | | ८ | |
| | ९ | | | | |
| १० | | | ११ | | |
| १२ | | | १३ | | |

